# Shri Minakshi Suprabhatam

# श्रीमीनाक्षीसुप्रभातम्

## Document Information

Text title : Shri Minakshi Suprabhatam

File name : mInAkShIsuprabhAtam.itx

Category : devii, mInAkShI, suprabhAta

Location : doc_devii

Author : Anantanandanatha

Proofread by : Rajesh Thyagarajan

Description/comments : Minakshi stutimanjari and Halasya Mahatmyam edited by by SV Radhakrishna Sastri

Latest update : May 20, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 23, 2023

*sanskritdocuments.org*

Shri Minakshi Suprabhatam

# श्रीमीनाक्षीसुप्रभातम्

श्रीस्वामिशास्त्रिणा अनन्तानन्दनाथेन विरचितं
ॐ नमो भगवत्यै श्रीचन्द्रशेखरमूर्तये ।
सच्चिदानन्दरूपिण्यै स्वात्मबोधप्रपूर्तये ॥

श्रीमान् गजास्यो मधुरापुरस्थो लम्बोदरो मीनदृगात्मजो यः ।
त्रिप्रस्थपूर्णाकृतिमोदकाढ्यः क्रियाद्गणेशो मम सुप्रभातम् ॥ १॥

मातङ्गकन्येति कवीन्द्रवन्द्या विद्यावतीपुण्यफलप्रदा या ।
श्रीपाण्ड्यराजस्य सुता च साऽम्बा करोतु देवी मम सुप्रभातम् ॥ २॥

चिदग्निजाता मधुरापुरेशी पट्टाभिषिक्ता मलयध्वजेन ।
यया जिता दिक्पतयो नृपाश्च करोतु देवी मम सुप्रभातम् ॥ ३॥

या त्रिस्तनीशानजयाय गत्वा दृष्ट्वा महेशं त्वतिसुन्दराङ्गम् ।
सम्मोहिताऽभूज्जनमोहदात्री करोतु देवी मम सुप्रभातम् ॥ ४॥

श्रीसुन्दरेशेक्षणमात्रलुप्तमध्यस्तनी शान्तमहेशयुद्धा ।
मीनाम्बका श्रीमधुरापुरेशी करोतु देवी मम सुप्रभातम् ॥ ५॥

वाक्कामशक्त्यादिमबीजपूर्वमन्त्रस्य लक्ष्यार्थतनुर्महेशी ।
षडङ्गशक्त्यावृतबिन्दुवासा करोतु देवी मम सुप्रभातम् ॥ ६॥

परप्रकाशादिमशङ्करान्त श्रीदिव्यसिद्धौघसुमानवौघैः ।
सदा परीता गुरुभिः स्वचक्रे करोतु देवी मम सुप्रभातम् ॥ ७॥

रत्यादि शक्तित्रयपञ्चबाणबाणैश्च कामादिमपञ्चमारैः ।
या सेविता मीननिभस्वनेत्रा करोतु देवी मम सुप्रभातम् ॥ ८॥

ब्राह्म्यादिशक्त्यष्टकसेविता या लक्ष्म्यादिशक्त्यष्टकसंश्रिताऽम्बा ।
कदम्बकान्तारतलैकवासा करोतु देवी मम सुप्रभातम् ॥ ९॥

वज्रादिसंशोभितहस्तपद्म वामादिभिष्षोडशशक्तिभिर्या ।

समावृता सा प्रियकप्रियाम्बा करोतु देवी मम सुप्रभातम् ॥ १०॥

त्रिशूलसंशोभिकरासिताङ्गमुख्यैर्वृता ह्यष्टसुभैरवैर्या ।
मीनाम्बका नीपवनैकवासा करोतु देवी मम सुप्रभातम् ॥ ११॥

मातङ्गिनीपूर्वकशक्तिसङ्घैः गणेशपूर्वैस्त्रिदिवैश्चतुर्भिः ।
शुकप्रियाऽम्बा परिसेव्यमाना करोतु देवी मम सुप्रभातम् ॥ १२॥

श्रीशारिकावेणुविपञ्चिकाढ्या श्रीद्वादशान्तस्थमतङ्गकन्या ।
या वै लघुश्यामतनुर्झषाक्षी करोतु देवी मम सुप्रभातम् ॥ १३॥

वाग्वादिनी या नकुलीति देवी सङ्कीर्त्यते सिद्धजनैः प्रपञ्चे ।
कवित्वदा कामितदा झषाक्षी करोतु देवी मम सुप्रभातम् ॥ १४॥

सप्तस्वराणामपि लक्ष्यभूता सङ्गीतयोगिन्यभिधीयते या ।
सानन्दरूपा झषलोचनाम्बा करोतु देवी मम सुप्रभातम् ॥ १५॥

सच्चित्स्वरूपा भवसङ्गरे मे जयप्रदा चन्द्रकलावतंसा ।
गुरुस्वरूपा मधुरापुरेशी करोतु देवी मम सुप्रभातम् ॥ १६॥

स्वर्णाब्जिनीतीरविहारशीलपदाम्बुजा वर्णतनूरपर्णा ।
भवान्धतामिस्रसमावृतस्य करोतु देवी मम सुप्रभातम् ॥ १७॥

अनन्तनागेन्द्रशयानविष्णु सहोद्भवा नीलतनुर्झषाक्षी ।
अनन्तकल्याणगुणैकभूमिः करोतु देवी मम सुप्रभातम् ॥ १८॥

इति अनन्तानन्दनाथेन विरचितं श्रीमीनाक्षीसुप्रभातं सम्पूर्णम् ।

Proofread by Rajesh Thyagarajan

*Shri Minakshi Suprabhatam*

pdf was typeset on May 23, 2023

Please send corrections to *sanskrit@cheerful.com*